दृषद्वती, स्त्री, (दृषत् पाषाणोऽस्त्यस्यामिति । दृषत् + मतुप् मस्य वः ।) नदीविशेषः । सा आर्य्यावर्त्तस्य पूर्व्वसीमा । (यथा, महाभारते । ३ । ८३ । ४ ।
"दक्षिणेन सरस्वत्या दृषद्वत्युत्तरेण च ।
ये वसन्ति कुरुक्षेत्रे ते वसन्ति त्रिविष्टपे ॥")
कात्यायनी । इति मेदिनी । ते, १६८ ॥

दृशा, स्त्री, (दृश् + पाचिकटाप् ।) चक्षुः । इति शब्दचन्द्रिका ॥

दृशाकाङ्क्ष्यं, क्ली, (दृशा दृशया वा आकाङ्क्ष्यं अभिलषणीयम् ।) पद्मम् । इति शब्दचन्द्रिका ॥

दृशानं, क्ली, (दृश्यते अनेनेति । दृश् + आनच् ।) ज्योतिः । इति मेदिनी । ने, ७५ ॥

दृशानः, पुं, (पश्यतीति । दृश् + "युधिबुधिदृशः किच ।" उणां । २ । ९० । इति आनच् । स च कित् ।) आचार्य्यः । इत्युणादिकोषः ॥ लोकपालः । ब्राह्मणः । उपाध्यायः । इति संक्षिप्तसारे उणादिवृत्तिः ॥ विरोचनः । इति मेदिनी । ने, ७५ ॥ (दृश्यते इति । कर्म्मणि आनच् । दृश्यमाने, त्रि । यथा, ऋग्वेदे ।१० । ४५ । ८ ।
"दृशानो रुक्म उर्विया व्यद्यौद्दुर्मर्षमायुः श्रिये रुचानः ॥")

दृशिः, } स्त्री, (दृश्यतेऽनयेति । दृश् + इन् । स च
दृशी, } कित् । वा ङीष् ।) चक्षुः । इति शब्दरत्नावली ॥ (यथा,—
"किं सम्भृतं रुचिरयोर्द्विजलक्ष्मयोस्ते
मध्ये सखी वहसि यत्र दृशिः श्रिता मे ॥"
इति भागवते । ५ । २ । १२ ।
चेतनः पुरुषः । यथा, पातञ्जलसूत्रम् । २।२५ ।
"तदभावात् संयोगाभावो हानं तद्दृशेः कैवल्यम् ।"
"तस्या अविद्याया अभावात् नाशात् संयोगाभावः संयोगस्य नाशो भवतीति शेषः। तच्च हानं संयोगविरामः । दृशेः पुरुषस्य कैवल्यं मुक्तिरिति चोच्यते ॥" इत्युक्तिः । यथा, तत्रैव । २ । २० ।
"द्रष्टा दृशिमात्रः शुद्धोऽपि प्रत्ययानुपश्यः ।"
दृशिमात्र इति दृक्शक्तिरेव विशेषणापरामृष्टेत्यर्थः ।" इति भाष्यम् ॥ दर्शनम् । यथा, ऋग्वेदे । ५ । ८० । ५ ।
"एषा शुभ्रा न तन्वो विदानोर्द्धेव स्नाती दृशये नो अस्थात् ॥"
"दृशये दर्शनाय" इति तद्भाष्ये सायनः ॥")

दृशोपमं, क्ली, (दृशाया नेत्रस्य उपमा यत्र ।) श्वेतपद्मम् । इति शब्दचन्द्रिका ॥

दृश्यं, त्रि, (दृश्यते इति । दृश् + कर्म्मणि क्यप् ।) दर्शनीयम् । द्रष्टव्यम् । इति व्याकरणम् ॥ (यथा, महाभारते । ३ । १३० । ५ ।
"अत्र वै चमसोद्भेदो यत्र दृश्या सरस्वती ।"
काव्यविशेषे, क्ली । यथा, साहित्यदर्पणे । ६।१।
"दृश्यश्रव्यत्वभेदेन पुनः काव्यं द्विधा मतम् ।
दृश्यं तत्राभिनेयं तद्रूपारोपात्तु रूपकम् ॥")

दृषत्, [द्] स्त्री, (दीर्य्यते असाविति । दृ + "दृणातेः षुग् ह्रस्वश्च ।" उणां १ । १३१ । इति अदिः षुक् ह्रस्वश्च ।) पाषाणः । (यथा, मेघदूते । ५७ ।
"तत्र व्यक्तं दृषदि चरणन्यासमर्द्धेन्दुमौलेः
शश्वत्सिद्धैरुपचितवलिं भक्तिनम्रः परीयाः ॥")
निष्पेषणशिला । इति मेदिनी । दे, ३२ ॥
("मांसं निरस्थि सुस्विन्नं पुनर्दृषदि पेषितम् ॥"
इति सुश्रुते सूत्रस्थाने ४६ अः ॥)

दृषत्सारं, क्ली, (दृषदः पाषाणस्य सार इव सारो यत्र ।) मुण्डायसम् । इति राजनिर्घण्टः ॥

दृष्टं, क्ली, (दृश् + कर्म्मणि क्तः ।) स्वपरचक्रजभयम् । इत्यमरः । २ । ८ । २० ॥ ईक्षिते, त्रि । यथा, मार्कण्डेये ।
"दृष्टदोषेऽपि हि ये ममत्वाकृष्टचेतनः ॥"

दृष्टरजाः, [स्] स्त्री, (दृष्टं रजो यस्याः ।) प्राप्तरजस्का । तत्पर्य्यायः । मध्यमा २ । इत्यमरः। २ । ६ । ८ ॥ प्रौढ़ा । इति राजनिर्घण्टः ॥

दृष्टान्तः, पुं, (दृष्टः अन्तो निश्चयो यस्मिन् ।) उदाहरणम् । (यथा, माघे । २ । ३१ ।
"क्षतिप्रयोगः परेणापि महिम्ना न महात्मनाम् ।
पूर्णश्चन्द्रोदयाकाङ्क्षी दृष्टान्तोऽत्र महार्णवः ॥")
शास्त्रम् । मरणम् । इति मेदिनी । ते, ११५ ॥
(अलङ्कारविशेषः । यथा, साहित्यदर्पणे । १० । ६९८ ।
"दृष्टान्तस्तु सधर्म्मस्य वस्तुनः प्रतिविम्बनम् ॥"
सधर्म्मस्येति प्रतिवस्तूपमाव्यवच्छेदः । अयमपि साधर्म्म्यवैधर्म्म्याभ्यां द्विधा । क्रमेणोदाहरणं यथा,—
अविदितगुणापि सत्कविभणितिः कर्णेषु वमति मधुधाराम् ।
अनधिगतपरिमलापि हि हरति दृशं मालतीमाला ॥")

दृष्टिः, स्त्री, (पश्यत्यनेनेति । दृश् + करणे क्तिन् ।) चक्षुः । इत्यमरः । २ । ६ । ९३ ॥ (यथा, साहित्यदर्पणे । ३ । ६८ ।
"दृष्टा दृष्टिमधोददाति कुरुते नालापमाभाषिता ॥")
बुद्धिः । (दृश् + भावे + क्तिन् ।) दर्शनम् । इति मेदिनी । टे,१० ॥ (यथा, मनुः । ६ । ४६ ।
"दृष्टिपूतं न्यसेत् पादं वस्त्रपूतं जलं पिबेत् ॥")
ग्रहाणां दृष्टिकथनम् । यथा,
तृतीयगृहे दशमगृहे च शनेः पूर्णदृष्टिरन्येषां पाददृष्टिः । पञ्चमगृहे नवमगृहे च गुरोः पूर्णदृष्टिरन्येषामर्द्धदृष्टिः । चतुर्थगृहे अष्टमगृहे च कुजस्य पूर्णदृष्टिरन्येषां त्रिपाददृष्टिः । सप्तमगृहे सर्व्वेषां पूर्णदृष्टिः । पञ्चमगृहे सप्तमे नवमे द्वादशे च राहोः पूर्णदृष्टिः । द्वितीये दशमे च त्रिपाददृष्टिः । तृतीये षष्ठे चतुर्थे अष्टमे चार्द्धदृष्टिः ॥*॥ ग्रहाणां दृष्ट्यभावनिर्णयो यथा,— क्षितिभवने एकादशे च राहोर्दृष्ट्यभावः । क्षितिभवने द्वितीये षष्ठे एकादशे द्वादशे चान्येषां दृष्ट्यभावः ॥*॥ एषां प्रमाणं यथा,—
"तृतीये दशमे चैव पाददृष्टिरुदाहृता ।
अर्द्धदृष्टिश्च नवमे पञ्चमे च प्रकीर्त्तिता ॥
चतुर्थे चाष्टमे चैव पादोना परिकीर्त्तिता ।
सप्तमे परिपूर्णा च फलमेवं प्रकल्पयेत् ॥
तृतीयदशमावार्किः पश्यन् पूर्णफलप्रदः ।
त्रिकोणगान् गुरुश्चैव चतुर्थाष्टमगान् कुजः ॥
सुतमदननवान्त्ये पूर्णदृष्टिः सुरारे-
र्युगलदशमराशौ दृष्टिमाचाश्रयार्द्धः ।
सहजरिपुचतुर्थेऽष्टमे चार्द्धदृष्टिः
क्षितिभवनसुपान्त्यं नैव दृश्यं हि राहोः ॥
स्वस्थानञ्च द्वितीयञ्च षष्ठमेकादशन्तथा ।
द्वादशाख्यं न पश्यन्ति शेषं पश्यन्ति ते ग्रहाः ॥"
इति ज्योतिषतत्त्वम् ॥

दृष्टिकृत्, क्ली, (दृष्टिं दृष्टिप्रसादं करोतीति । कृ + क्विप् तुगागमश्च । अतीवशोभया लोकानां नेत्राकर्षकत्वादस्य तथात्वम् ।) स्थलपद्मम् । इति शब्दचन्द्रिका ॥ (दर्शनकारके, त्रि ॥)

दृष्टिकृतं, क्ली, (दृष्टेः दर्शनाय कृतमिव । अतीवशोभाकरत्वात् तथात्वम् ।) स्थलपद्मम् । इति शब्दरत्नावली ॥

दृष्टिगुणः, पुं, (दृष्ट्या गुण्यते अभ्यस्यते यत्र । गुणत् क अभ्यासे + घञ् ।) बाणादिलक्ष्यम् । इति शब्दमाला ॥

दृष्टिबन्धुः, पुं, (दृष्टेश्चक्षुषो बन्धुरिव ।) खद्योतः । इति शब्दरत्नावली ॥

दृष्टिविक्षेपः, पुं, (दृष्टेर्विक्षेपः ।) कटाक्षः । इति हलायुधः ॥

दृह, दृहौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) अष्टमस्वरी दर्हति । इति दुर्गादासः ॥

दृह, इ दृहौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) अष्टमस्वरी । इ, दृंहति । इति दुर्गादासः ॥

दृहितः, त्रि, दृहधातोः कर्त्तरि क्तेन निष्पन्नः । वृद्धिप्राप्तः ॥

दॄ, गि भिये । इति कविकल्पद्रुमः ॥ (क्र्यां-परं-अकं-सेट् ।) गि, दृणाति दीर्णः दीर्णिः । भिये भये । इति दुर्गादासः ॥

दॄ, म भिये । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) म, दरयति । भिये भये । इति दुर्गादासः ॥

दॄ, य गि विदारे । इति कविकल्पद्रुमः ॥ (दिवां-क्र्यां च-परं-सकं-सेट् ।) य, दीर्य्यति । गि, दृणाति दीर्णः दीर्णिः । इति दुर्गादासः ॥

दे, ङ पालने । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-अनिट् ।) ङ, दीनान् यो दयते नित्यम् । इति हलायुधः । इति दुर्गादासः ॥

देदीप्यमानः, त्रि, पुनःपुनरतिशयेन वा दीप्यते यः । (दीप + यङ् + शानच् ।) अतिशयदीप्तिविशिष्टः । इति व्याकरणम् ॥

देयं, त्रि, (दा + "अचो यत् ।" ३ । १ । ९७ । इति यत् । "ईद्यति ।" ६ । ४ । ६५ । इति